# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर –२०१८

| | | |
|---|---|---|
| *कक्षा- आचार्यप्रथमवर्षः* (SEM- 1) | *प्रश्नपत्रम्-४* | *गुणाः -७०* |
| *विषयः-साहित्यम् (अलंङ्कारवर्गः)* | *कोड-* CC 4.1.3<br>(NEW & OLD SYLLABUS) | *समयः - २ तः ५* |
| *दिनाङ्कः-१८-१२-२०१८* | *सन्दर्भग्रन्थः - कुवलयानन्दः* | |

## प्रथमान्वितिः

**प्रश्नः १ ''अधोलिखितयोः एकस्य व्याख्यां कुरुत ।** **०५**

१ *उपमानोपमेयत्वं यदैकस्यैव वस्तुनः ।*
*इन्दुरिन्दुरिवं श्रीमानित्यादौ तदनन्वयः ॥*

२ *संभावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना ।*
*उक्तानुक्तास्पदाद्यात्र सिद्धाऽसिद्धास्पदे परे ॥*

**प्रश्नः २ अधोलिखितयोः अलङ्कारयोरेकस्य । निबन्धात्मकमुत्तरं लिखत ।** **१०**

१ *अतिशयोक्त्यलङ्कारः ।*

२ *तुल्ययोगितालङ्ककारः ।*

## द्वितीयान्वितिः

**प्रश्नः ३ अधोलिखितालङ्कारयोः एकस्य व्याख्यां लिखित।** **०५**

१ *वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः।*
*मेदन भाति कलभः प्रतापेन महीपतिः ॥*

२ *अप्रस्तुतप्रशंसा स्यात् सा यत्र प्रस्तुताश्रया।*
*एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते ॥*

**प्रश्नः ४ कस्याप्येकस्य निबन्धात्मकमुत्तरं लिखत ।** **१०**

१ *निदर्शनालङ्कारः ।*

२ *व्याजनिन्दालङ्कारः।*

## तृतीयान्वितिः

**प्रश्नः ५ अधोलिखितयोः एकस्मिन् विषये व्याख्यां कुरूत ।** **०५**

१ *विभावना विनापि स्यात् कारणं कार्यजन्म चेत् ।*
*अप्यलाक्षारसासिक्तं रक्तं तच्चरणद्वयम् ॥*

२ *विशेषः ख्यातमाधारं विनाप्याधेयवर्णनम् ।*
*गतेऽपि सूर्ये दीपस्थास्तमश्छिन्दन्ति तत्कराः ॥*

**प्रश्नः ६ अधोलिखितयो अलङ्कारयोरेकस्य निबन्धात्मकमुत्तरं लिखतः । १०**

१ *असङ्गत्यलङ्कारः।*

२ *व्याघातालङ्ककारः ।*

## चतुर्थानन्वितिः

**प्रश्नः ७ कस्याप्येकस्य व्याख्या कार्या । ०५**

१ *गृहीतमुक्तरीत्यार्थश्रेणिरेकावलिर्मता ।*
*नेत्रे कर्णान्तविश्रान्ते कर्णौ दोः स्तम्भदोलितौ ॥*

२ *समाधिः कार्यसौकर्यं कारणान्तरसंनिधेः ।*
*उत्कण्ठिता च तरूणी जगामास्तं च भानुमान् ॥*

**प्रश्नः ८ कस्याप्येकस्य निबन्धात्मकमुत्तरं लिखत । १०**

१ *प्रत्यनीकालङ्कारः ।*

२ *काव्यलिङ्गालकारः।*

**प्रश्नः ९ अधोलिखितभ्यः दशप्रश्नानां लधूत्तराणि लिखन्तु । १०**

१ *कुवलयानन्दग्रन्थस्य रचयिता कः अस्ति ?*

२ *उपमालङ्कारस्य लक्षणं लिखत ?*

३ *प्रतीपालङ्कारस्य उदाहरणं लिखन्तु ?*

४ *भ्रान्तापहनुत्यलङ्कारः कदा भवति ?*

५ *तापेन भ्राजते सूरः शूरश्चापेन राजते इत्यत्र कोऽलङ्कारः?*

६ *व्यतिरेकालङ्कारः कदा भवति?*

७ *समासोक्त्यलङ्कारस्य उदाहरणं लिखन्तु ?*

८ *यत्रानेकार्थशब्दानां विन्यासो भवेत् तत्र कोऽलङ्कारो भवति?*

९ *पर्यायोक्तालङ्कारस्य लक्षणं लिखत ?*

१० *आक्षेपालङ्कारस्य उदाहरणं लिखत ?*

११ *विशेषोक्त्यलङ्कारः कदा भवति?*

१२ *यत्र द्वयोः अननुरूपयोः पदार्थयोः वर्णनं भवेत् तत्र कोऽलङ्कारो भवति ?*

१३ *सारालङ्कारस्य .उदाहरणं लिखत?*

१४ *पद्मं मुक्त्वा गता चन्द्रं कामिनीवदनोपमा इत्यत्र कोऽलङ्कारो भवति ?*

१५ *अर्थापत्त्यलङ्कारस्य लक्षणं लिखत?*

--oo--